# shrIgaNeshAShTakam by Shri VishNu

# શ્રીવિષ્ણુકૃતં શ્રીગણેશાષ્ટકમ્

## Document Information

```
Text title : gaNeshAShTakam viShNukRitam brahmavaivartapurANe
File name : gaNeshAShTakamviShNuBVP.itx
Category : aShTaka, ganesha
Location : doc_ganesha
Transliterated by : NA
Proofread by : NA
Description-comments : Brahmavaivartapurana 3.44.85-98
Latest update : February 26, 2022
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 26, 2022

*sanskritdocuments.org*

# શ્રીવિષ્ણુકૃતં શ્રીગણેશાષ્ટકમ્

ગણેશનામાષ્ટકમ્, ગણેશસ્તોત્રમ્

નામાષ્ટકસ્તોત્રમ્ ચ

શ્રીવિષ્ણુરુવાચ ।
ગણેશમેકદન્તઞ્ચ હેરમ્બં વિઘ્નનાયકમ્ ।
લમ્બોદરં શૂર્પકર્ણં ગજવક્ત્રં ગુહાગ્રજમ્ ॥

નામાષ્ટકાર્થં પુત્રસ્ય શ‍ૃણુ માતર્હરપ્રિયે ।
સ્તોત્રાણાં સારભૂતં ચ સર્વવિઘ્નહરં પરમ્ ॥

જ્ઞાનાર્થવાચકો ગશ્ચ ણશ્ચ નિર્વાણવાચકઃ ।
તયોરીશં પરં બ્રહ્મ ગણેશં પ્રણમામ્યહમ્ ॥ ૧॥

એકશબ્દઃ પ્રધાનાર્થો દન્તશ્ચ બલવાચકઃ ।
બલં પ્રધાનં સર્વસ્માદેકદન્તં નમામ્યહમ્ ॥ ૨॥

દીનાર્થવાચકો હેશ્ચ રમ્બઃ પાલકવાચકઃ ।
પાલકં દીનલોકાનાં હેરમ્બં પ્રણમામ્યહમ્ ॥ ૩॥ (પરિપાલકં તં દીનાનાં)

વિપત્તિવાચકો વિઘ્નો નાયકઃ ખણ્ડનાર્થકઃ ।
વિપત્ખણ્ડનકારન્તં પ્રણમે વિઘ્નનાયકમ્ ॥ ૪॥ (નમામિ)

વિષ્ણુદત્તૈશ્ચ નૈવેદ્યૈર્યસ્ય લમ્બં પુરોદરમ્ । (લમ્બોદરં પુરા)
પિત્રા દત્તૈશ્ચ વિવિધૈર્વન્દે લમ્બોદરઞ્ચ તમ્ ॥ ૫॥

શૂર્પાકારૌ ચ યત્કર્ણૌ વિઘ્નવારણકારકૌ । (વિઘ્નવારણકારણૌ)
સમ્પદૌ જ્ઞાનરૂપૌ ચ શૂર્પકર્ણં નમામ્યહમ્ ॥ ૬॥ (સમ્પદાસ્ફાલરૂપૌ)

વિષ્ણુપ્રસાદં મુનિના દત્તં યન્મૂર્ધ્નિ પુષ્પકમ્ ।
(વિષ્ણુપ્રસાદપુષ્પઞ્ચ યન્મૂર્ધ્નિ મુનિદત્તકમ્ ।)
તદ્ગજેન્દ્રમુખં કાન્તં ગજવક્ત્રં નમામ્યહમ્ ॥ ૭॥ (તદ્ગજેન્દ્રવક્ત્રયુક્તં)

ગુહસ્યાગ્રે ચ જાતોઽયમાવિર્ભૂતો હરાલયે । (હરગૃહે)
વન્દે ગુહાગ્રજં દેવં સર્વદેવાગ્રપૂજિતમ્ ॥ ૮॥

એતન્નામાષ્ટકં દુર્ગે નાનાશક્તિયુતં પરમ્ ।
પુત્રસ્ય પશ્ય વેદે ચ તદા કોપં વૃથા કુરુ ॥

એતન્નામાષ્ટકં સ્તોત્રં નામાર્થસંયુતં શુભમ્ । (નામાર્થસહિતં)
ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં સ સુખી સર્વતો જયી ॥

તતો વિઘ્નાઃ પલાયન્તે વૈનતેયાદ્યથોરગાઃ ।
ગણેશ્વરપ્રસાદેન મહાજ્ઞાની ભવેદ્ધ્રુવમ્ ॥

પુત્રાર્થી લભતે પુત્રં ભાર્યાર્થી વિપુલાં સ્ત્રિયામ્ । (કુશલાં સ્ત્રિયામ્)
મહાજડઃ કવીન્દ્રશ્ચ વિદ્યાવાંશ્ચ ભવેદ્ધ્રુવમ્ ॥

ઇતિ બ્રહ્મવૈવર્તે મહાપુરાણે તૃતીયે ગણપતિખણ્ડે
નારદનારાયણસંવાદે વિષ્ણુપદિષ્ટં ગણેશનામાષ્ટકં
સ્તોત્રં સમ્પૂર્ણમ્ ॥

(પુત્રનામાષ્ટકમ્)

Description of eight names of gaNesha
gaNesha, ekadanta, heramba, vighnanAyaka,
lambodara, shUrpakarNa, gajavaktraM, guhAgraja

NA

*shrIgaNeshAShTakam by Shri VishNu*
pdf was typeset on February 26, 2022

Please send corrections to *sanskrit@cheerful.com*